श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवराहपुराणे रैभ्य विरचितम्

# ॥ श्री गदाधरस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गदाधरस्तोत्रम् ॥

रैभ्य उवाच

गदाधरं विबुधजनैरभिष्टुतं
धृतक्षमं क्षुधितजनाऽर्तिनाशनम्।
शिवं विशालाऽसुर सैन्यमर्दनं
नमाम्यहं हृतसकलाऽशुभं स्मृतौ ॥ 1 ॥

पुराणपूर्वं पुरुषं पुरुष्टुतं
पुरातनं विमलमलं नृणां गतिम्।
त्रिविक्रमं हृतधरणिं बलोर्जितं
गदाधरं रहसि नमामि केशवम् ॥ 2 ॥

विशुद्धभावं विभवैरुपावृतं
श्रियावृतं विगतमलं विचक्षणम्।
क्षितीश्वरैरपगतकिल्बिषैः स्तुतं
गदाधरं प्रणमति यः सुखं वसेत् ॥ 3 ॥

सुराऽसुरैरर्चितपादपङ्कजं
केयूरहाराङ्गदमौलिधारिणम्।
अब्धौ शयानं च रथाङ्गपाणिनं
गदाधरं प्रणमति यः सुखं वसेत् ॥ 4 ॥

सितं कृते त्रैतयुगेऽरुणं विभुं
तथा तृतीये नीलसुवर्णमच्युतम्।

कलौ युगेऽलिप्रतिमं महेश्वरं
गदाधरं प्रणमति यः सुखं वसेत् ॥ 5 ॥

बीजोद्भवो यः सृजते चतुर्मुखं
तथैव नारायणरूपतो जगत्।
प्रपालयेद्रुद्रवपुस्तथाऽन्तकृत्
गदाधरो जयतु षडर्धमूर्तिमान् ॥ 6 ॥

सत्वं रजश्चैव तमो गुणास्त्रयः
त्वेतेषु विश्वस्य समुद्भवः किल।
स चैक एव त्रिविधो गदाधरो
दधातु धैर्यं मम धर्ममोक्षयोः ॥ 7 ॥

संसारतोयार्णवदुःखतन्तुभिः
वियोगनक्रक्रमणैः सुभीषणैः।
मज्जन्तमुच्चैः सुतरां महाप्लवो
गदाधरो मामुदधौ तु योऽतरत् ॥ 8 ॥

स्वयं त्रिमूर्तिः खमिवात्मनात्मनि
स्वशक्तितश्चाण्डमिदं ससर्ज ह।
तस्मिञ्जलोत्थासनमाप तैजसं
ससर्ज यस्तं प्रणतोऽस्मि भूधरम् ॥ 9 ॥

मत्स्यादिनामानि जगत्सु चाश्नुते
सुरादिसंरक्षणतो वृषाकपिः।
मुखस्वरूपेण स सन्ततो विभुः
गदाधरो मे विदधातु सद्गतिम् ॥ 10 ॥

एतच्च रैभ्यनिर्दिष्टं
स्तोत्रं विष्णोर्गदाभृतः।

यः पठेत्स गयां गत्वा
पिण्डदानाद्विशिष्यते ॥ **11** ॥

॥ श्री गदाधरस्तोत्रं समाप्तम् ॥